## एकादशः पाठः

# प्रतिश्रुतिपालनम्

ईशवीये सप्तमशताब्दे विशाखदत्तो नाम नाटककारः मुद्राराक्षसं नाम नाटकम् अरचयत्। अस्मिन् नाटके चन्द्रगुप्तमौर्यः नायकः तस्य गुरुतुल्यः महामात्यः चाणक्यः अतीवकूटनीतिकुशलः आसीत् । तस्य कूटकौशलात् शत्रुः नन्दराजः पराजितः । अधोलिखिते नाट्यांशे चन्दनदासस्य श्रेष्ठचारित्र्यं प्रस्तुतमस्ति । चन्दनदासः पाटलिपुत्रनगरस्य श्रेष्ठिविशेषः नन्दामात्यस्य राक्षसस्य स्निग्धः सुहृद् च आसीत्। नन्दे नष्टे राक्षसोऽपि स्वकुटम्बं चन्दनदासस्य गृहे, संस्थाप्य पलायितः। चाणक्येन गृहीतः चन्दनदासः मृत्युदण्डं वृणुते किन्तु राक्षसकुटुम्बं तु चाणक्याय न समर्पयति एवं चन्दनदासः उच्चादर्शान् प्रास्तौत्।

**चाणक्यः** - भोः श्रेष्ठिन् ! स चापरिक्लेशः कथमाविर्भवतीति पुनः प्रष्टव्याः स्मो भवता ?

**चन्दनदासः** - आज्ञापयतु आर्यः।

**चाणक्यः** - सङ्क्षेपतो राजनि अविरुद्धाभिर्वृत्तिभिर्वर्त्तितव्यम्।

**चन्दनदासः** - आर्य ! कः पुनश्चान्य आर्येणावगम्यते।

**चाणक्यः** - भवान् एव तावत् प्रथमः।

**चन्दनदासः** - (कर्णौपिधाय) शान्तं पापं, शान्तं पापं, कीदृशः तृणानामग्निना सह विरोधः ?

**चाणक्यः** - अयमीदृशो विरोधो, यत् त्वमद्यापि राजापथ्यकारिणोऽमात्यराक्षसस्य गृहजनं स्वगृहमभिनीय रक्षसि।

**चन्दनदासः** - आर्य ! अलीकमेतत्, केनापि अनार्येण आर्यस्य निवेदितम्।

**चाणक्यः** - भोः श्रेष्ठिन् ! अलमाशङ्कया, भीता पूर्वराजपुरुषाः पौराणामनिच्छतामपि गृहेषु गृहजनं निक्षिप्य देशान्तरं व्रजन्ति, ततः तत्प्रच्छादनमेव दोषमुत्पादयति।

**चन्दनदासः** - एवं नु इदम्। तस्मिन् समये आसीद् अस्मद्गृहे अमात्यराक्षसजनस्य गृहजनः।

**चाणक्यः** - प्रथमम् अनृतम्, इदानीम् आसीदिति परस्परविरोधिनी वचने।

**चन्दनदासः** - एतावदेवास्ति मे वाक्छलम्।

**चाणक्यः** - भोः श्रेष्ठिन् ! चन्द्रगुप्ते राजनि न परिग्रहः छलानां, तत् समर्पय राक्षसस्य गृहजनमच्छलं भवतु भवतः।

**चन्दनदासः** - आर्य ! ननु विज्ञापयामि- 'तस्मिन् समये आसीदस्मद्गृहे अमात्यराक्षसस्य गृहजन' इति।

**चाणक्यः** - अथ इदानीं क्व गतः ?

**चन्दनदासः** - न जानामि कुत्र गतः ? इति।

**चाणक्यः** - (स्मितं कृत्वा) कथं न ज्ञायते नाम ? भो श्रेष्ठिन् शिरसि फणी दूरे तत्प्रतीकारः। अन्यच्च नन्दमिव विष्णुगुप्तः-

*(अर्द्धोक्तौ लज्जां नाटयति)*

**चन्दनदासः** - (स्वगतम्)- उपरि धनं धनरहितं दूरे दयिता किमेतदाहिमवति दिव्यौषधयः शीर्षे सर्पः समाविष्टः।

*(नेपथ्ये पुनः कलकलः)*

**चाणक्यः** - शार्ङ्गरव ! ज्ञायतां, पुनः किमेतत् ?

**शिष्यः** - यदाज्ञापयत्युपाध्यायः। (इति निष्क्रम्य, पुनः प्रविश्य) उपाध्याय ! असौ राजाज्ञया राजा पथ्यकारी कायस्थः शकटदासः शूलमारोपयितुं नीयते।

**चाणक्यः** - स्वकर्मफलभाक् भवतु ! भोः श्रेष्ठिन् ! एवमयं राजापथ्यकारी तीक्ष्णदण्डो राजा, न मर्षयिष्यति राक्षसकलत्रप्रच्छादनं भवतः, तद् रक्ष परकलत्रेणात्मनः कलत्रं जीवितञ्च ।

**चन्दनदासः** - आर्य्य ! किं मे भयं दर्शयसि ? सन्तमपि गेहे अमात्यराक्षसस्य गृहजनं न समर्पयामि, किं पुनरसन्तम् ।

**चाणक्यः** - चन्दनदास ! एष ते निश्चयः ?

**चन्दनदासः** - वाढम्, एष मे स्थिरो निश्चयः ।

**चाणक्यः** - (स्वगतम्) साधु चन्दनदास ! साधु-

***सुलभेष्वर्थलाभेषु परसंवेदने जनः ।***
***क इदं दुष्करं कुर्यादिदानीं शिबिना विना ।।***

(प्रकाशम्) चन्दनदास ! एष ते निश्चयः ?

**चन्दनदासः** - वाढम्।

**चाणक्यः** - (सक्रोधम्) दुरात्मन् दुष्टवणिक् ! अनुभूयतां तर्हि राजकोपः।

**चन्दनदासः** - (बाहू प्रसार्य) सज्जोऽस्मि, अनुतिष्ठत्वार्य आत्मनोऽधिकारस्यानुरूपम्।

**चाणक्यः** - (सक्रोधम्) शार्ङ्गरव, उच्यतामस्मद्वचनात् कालपाशिको दण्डपाशिकश्च-'शीघ्रमयं दुष्टवणिक् निगृह्यताम्' अथवा तिष्ठतु, उच्यतां दुर्गपालो विजयपालश्च-'गृहीतगृहसारमेनं सपुत्रकलत्रं संरभ्य रक्ष तावत्, यावत् मया वृषलाय कथ्यते, स एवास्य प्राणहरं दण्डमाज्ञापयिष्यति।'

**शिष्यः** - यदाज्ञापयत्युपाध्यायः। श्रेष्ठिन् ! इतः इतः।

**चन्दनदासः** - (उत्थाय) आर्य्य ! अयमागच्छामि। दिष्ट्या मित्रकार्येण मे विनाशो जनितः न पुनः पुरुषदोषेण।

## शब्दार्थ:

| | | |
|---|---|---|
| श्रेष्ठिन् | - | वणिक् |
| वृत्ति: | - | प्रजा |
| अपथ्यकारी | - | घृणित पथ्यविपरीतकारी |
| अनृतम् | - | असत्यम् |
| वाक्छलम् | - | वाणीधौर्त्यम् |
| फणी | - | सर्प: |
| प्रच्छादनम् | - | आवरणम् |
| समाविष्ट: | - | प्रविष्ट: |
| पौराणाम् | - | नगरजनानाम् नागरिकाणाम् |
| कलकल: | - | ध्वनिविशेष: |
| शूलम् | - | कण्टक: |
| न मर्षयिष्यति | - | न सहिष्यति |
| शिविना विना | - | राजाशिविं विहाय |
| दिष्ट्या | - | भाग्येन |
| संरभ्य | - | शीघ्रतया |

## अभ्यास:

### 1. एकपदेन उत्तरं लिखत-

क. कस्य गृहे राक्षसस्य गृहजन: आसीत् ?

ख. चन्दनदास: क: आसीत् ?

ग. चाणक्य: चन्दनदासं किं दर्शयति ?

घ. चन्दनदासस्य निश्चय: कथं आसीत् ?

ङ. शार्ङ्गरव: क: आसीत् ?

### 2. एकवाक्येन उत्तरं लिखत-

क. चन्दनदास: चाणक्यं किं विज्ञापितवान् ?

ख. चन्दनदासस्य सुहृद् क: आसीत् ?

ग. अमात्यराक्षसस्य गृहजन: कुत्र आसीत् ?

घ. चाणक्य: चन्दनदासं दण्डयितुं कस्य समीपं प्रेषयति ?

ङ. राजाज्ञया क: शूलमारोपयितुं नीयते ?

### 3. त्रिंशतपदैः उत्तरं लिखत-

क. यदा चाणक्यः चन्दनदासं राक्षसस्य गृहजनाय अर्पणाय भयं ददाति तदा चन्दनदासः किं कथयति ?

ख. चाणक्यः चन्दनदासस्य विषये मनसि किं विचारयति ?

ग. दण्डाज्ञां श्रुत्वा चन्दनदासः किं कथयति ?

घ. चाणक्यः चन्दनदासं संक्षेपतः किं वदति ?

ङ. चन्दनदासः कर्णौ पिधाय किं कथयति ?

### 4. अधोलिखितानां पदानां समासविग्रहं कुरुत-

| | पदम् | | समासविग्रह |
|---|---|---|---|
| | गृहजनम् | = | गृहस्य जनम् |
| १. | राजपुरुषाः | = | |
| २. | अस्मद्गृहे | = | |
| ३. | अर्थलाभेषु | = | |
| ४. | कालपाशिकः | = | |
| ५. | दण्डपाशिकः | = | |
| ६. | प्राणहरम् | = | |
| ७. | मित्रकार्येण | = | |
| ८. | पुरुषदोषेण | = | |

### 5. अधोलिखितानां रेखांकितपदानां विभक्तिनिर्देशं कुरुत-

**उदाहरणम्-**कीदृशः तृणानां अग्निना सह विरोधः। (तृतीया)

क. अलम् आशङ्कया। ( )

ख. आमात्यराक्षसस्य गृहजनं न समर्पयामि। ( )

ग. दिष्ट्या मित्रकार्येण मे विनाशो जनितः। ( )

घ. सुलभेषु अर्थलाभेषु परसंवेदने जनः। ( )

ङ. शार्ङ्गरव उच्यताम् अस्मद्-वचनात् कालपाशिको दण्डपाशिकश्च।

6. **लकारपुरुषवचनानि लिखत-**

| पदानि | पुरुषः | वचनम् | लकारः |
|---|---|---|---|
| उत्पादयति | | | |
| जानामि | | | |
| व्रजन्ति | | | |
| विज्ञापयामि | | | |
| ज्ञायते | | | |

7. **प्रकृतिप्रत्ययौ लिखत-**

निक्षिप्य, आरोपयितुम् समर्प्य

संरभ्य गतः

8. **समुचितपदैः मेलनं कुरुत-**

| (अ) | (ब) |
|---|---|
| अनुभूयताम् | दर्शयसि |
| शूलमारोपियितुम् | न समर्पयामि |
| गृहजनं | कुत्र गतः |
| भयं | नीयते |
| न जानामि | राजकोपः |

9. **विभक्तिं वचनं च लिखत-**

राजनि अनुभूय तृणानाम् अग्निना

निक्षिप्य गेहे वृषलाय अभिनीय

**योग्यताविस्तारः-**

- प्रमुखसंस्कृतनाटककाराणां नामानि लिखत।
- प्रमुखसंस्कृतनाटकानां नामानि लिखत।
- मुद्राराक्षसनाटकस्य परिचयं लिखत।

❖ ❖ ❖

## द्वादशः पाठः

# लक्ष्म्याः अनासक्तिः

ईसवीये सप्तमशताब्दे: महाकविः बाणः कादम्बरीनामकं गद्यकाव्यम् अरचयत्। तत्र महामन्त्री शुकनासः युवराजं कथानायकं चन्द्रापीडं लक्ष्म्याः, राजलक्ष्म्याश्च स्वभावविषये वर्णयन् लोकपालनार्थं सावधानेन वर्तितव्यम् इति उपदिशति। लक्ष्मीः सदा स्वभावतः गतिशीला एव वर्तते। सा नैव कदापि वंशे, पुरुषे वा चिरं रमते विरमते वा। अत्र उपमापरम्परा सरसा, रचना कौशलं च प्रभावोत्पादकम् एवं बाणशैली ज्ञेया।

अवलोकयतु तावत् कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम्। इयं हि खड्गमण्डलोत्पलवनविभ्रमभ्रमरी लक्ष्मीः क्षीरसागरात् पारिजातपल्लवेभ्यो रागम्, इन्दुशकलादेकान्तकताम्, उच्चैः श्रवसश्चञ्चलताम्, कालकूटान्मोहनशक्तिम्, मदिराया मदम्, कौस्तुभमणेर्नैष्ठुर्यम्,इत्येतानि सहवासपरिचयवशात् विरहविनोदचिह्नानि गृहीत्वोद्गता।न ह्येवंविधमपरिचितमिह जगति किंचिदस्ति यथेयमनार्या। लब्धापि खलु दुःखेन परिपाल्यते। दृढ़गुणसंदाननिस्पन्दीकृतापि नश्यति। उद्दामदर्पभटसहस्रोल्लासितासिलता-पञ्जरविधृताऽप्यक्रामति। मदजलदुर्दिनान्धकारगजघटितधनघटापरिपालितापि प्रपलायते। न परिचयं रक्षति। नाभिजनमीक्षते। न रूपमालोकयते। न कुलक्रमनुवर्तते। न शीलं पश्यति। न वैदग्ध्यं गणयति। न श्रुतमाकर्णयति। न धर्ममनुरुध्यते। न त्यागमाद्रियते। न विशेषज्ञतां विचारयति। नाचारं पालयति। न सत्यमनुरुध्यते। न लक्षणं प्रमाणीकरोति। गन्धर्वनगरलेखेव पश्यत एव नश्यति। अद्यापि आरुढमन्दरपर्वतपरिवर्तावर्तभ्रान्तिजनितसंस्कारेव परिभ्रमति। कमलिनी-संचरण-व्यतिकर-लग्न नलिननालकण्टकेव न क्वचिदपि निर्भरमनुबध्नाति पदम्। पारुष्यमिवोपशिक्षितुमसिधारासु निवसति। विश्वरूपत्वमिव ग्रहीतुमाश्रिता नारायणमूर्तिम्, अप्रत्ययबहुला च दिवसान्तकमलमिव समुचितमूलदण्डकोशमण्डलमपि मुञ्चति भूभुजम्, लतेव विटपकानध्यारोहति।

गङ्गेव वसुजनन्यपि तरङ्गबुद्बुद्चञ्चला, दिवसकरगतिरिव प्रकटिविविधसङ्क्रान्तिः, पातालगुहेव तमोबहुला, हिडिम्बेव भीमसाहसैकहार्यहृदया, प्रावृत्तिऽवाचिरद्युतिकारिणी, दुष्टपिशाचीव दर्शितानेकपुरुषोच्छ्राया स्वल्पसत्वमुन्मत्तीकरोति। सरस्वती-परिगृहीतमीर्ष्ययेव नालिङ्गति जनम्। गुणवन्तमपवित्रमिव न स्पृशति। उदारसत्त्वममङ्गलमिव न बहु मन्यते। सुजनमनिमित्तमिव न पश्यति। अभिजातमहिमिव लङ्घयति। शूरं कण्टकमिव परिहरति। दातारं दुःस्वप्नमिव न स्मरति। विनीतं पातकिनमिव नोपसरति। मनस्विनमुन्मत्तमिव उपहसति। परस्परविरूद्धं चेन्द्रजालमिव दर्शयन्ती प्रकटयति जगति निजं चरितम्। तथा हि सन्ततमूष्माणमुपजनयन्त्यपि जाड्यमुपजनयति। उन्नतिमादधानापि नीचस्वभावतामाविष्करोति। तोयराशिसम्भवापि तृष्णां संवर्धयति। ईश्वरतां दधानाप्यशिवप्रकृतित्वमातनोति। बलोपचयमाहरन्त्यपि लघिमानमापादयति। अमृतसहोदरापि कटुकविपाका, विग्रहवत्यप्यप्रत्यक्षदर्शना, पुरुषोत्तमरतापि खलजनप्रिया, रेणुमयीव स्वच्छमपि कलुषीकरोति। यथा यथा चेयं चपला दीप्यते तथा तथा दीपशिखेव कज्जलमलिनमेव कर्म केवलमुद्वमति।

## शब्दार्थः

| | | |
|---|---|---|
| अवलोकयतु | - | पश्यतु |
| क्षीरसागरः | - | समुद्रः |
| मदिरा | - | मद्यम् |
| नैष्ठुर्यम् | - | निर्दयता |
| लब्धापि | - | प्राप्ता अपि |
| अनुरुध्यते | - | अनुरोधं करोति |
| असिधारासु | - | खड्गधारासु |
| इन्द्रजालमिव | - | मायया तुल्यम् |
| कज्जलमलिनमेव | - | कज्जलकृष्णीकृतम् इव |
| कण्टकमिव | - | कण्टकेन सदृशम् |
| पारूष्यम् | - | कठोरता |
| कल्याणाभिनिवेशः | - | सन्मार्गे प्रवेशः |
| पारिजातम् | - | देववृक्षविशेषम् |
| आद्रियते | - | सभाजयति/आदरं करोति |
| प्रावृड् | - | वर्षा |
| परिहरति | - | दूरीकरोति |
| पातकिनम् | - | पापिनम् |
| मनस्विन् | - | मनोनिग्रही |
| जाड्यम् | - | मूर्खताम् |
| आविष्करोति | - | उत्पन्नं करोति/उत्पादयति |
| खलजनप्रिया | - | दुष्टजनप्रिया |
| चपला | - | चञ्चला |

## अभ्यासः

### 1. एकपदेन उत्तरं लिखत-

क. लक्ष्मीः इन्दुशकलात् कां विशेषतां गृहीत्वा निर्गता ?

ख. का इव लक्ष्मीः पश्यत एव नश्यति ?

ग. लक्ष्मीः किम् उपशिक्षितुम् असिधारासु निवसति ?

घ. लक्ष्मीः कं अपवित्रमिव न स्पृशति ?

ङ. लक्ष्मीः कं कष्टकमिव परिहरति ?

### 2. एकवाक्येन उत्तरं लिखत-

क. लक्ष्मीः क्षीरसागरात् कान् विशेषान् गृहीत्वा उद्गता ?

ख. लक्ष्म्याः अनार्यत्वसिद्धये वर्णितेषु कारणेषु एकं कारणं लिखत ?

ग. लक्ष्मीः कथं न निर्भरपदमनुबध्नाति ?

घ. लक्ष्मीः कथं निजचरितं प्रकटयति ?

ङ. लक्ष्मीः शूरं किमिव परिहरति ?

### 3. त्रिंशतपदैः उत्तरं लिखत-

क. लक्ष्म्याः स्वरूपं वर्णयत।

ख. लक्ष्मीं प्राप्य के दुर्गुणाः प्रादुर्भवन्ति ?

ग. लक्ष्मीः किं किं करोति ?

घ. सज्जनान् लक्ष्मीः कथं पश्यति ?

ङ. लक्ष्मीः क्षीरसागरात् कान् विशेषान् गृहीत्वा निर्गता, तेषां वर्णनं कुरुत।

### 4. समुचितपदेन रिक्तस्थानं पूरयत-

क. पारुष्यमिवोपशिक्षितुमसिधारासु.............................. । (निवसति/गच्छति)

ख. ...................... पातकिनमिव नोपसरति। (विनीतम्/अविनीतम्)

ग. .................... प्रमाणीकरोति। (न लक्षणं/न तत्क्षणम्)

घ. गन्धर्वनगरलेखेव पश्यत एव ............................. । (प्रादुर्भवति/नश्यति)

ङ. .......................... अपवित्रमिव न स्पृशति। (गुणवन्तम्/लक्ष्मीवन्तम्)

## 5. सन्धिविच्छेदं कुरुत-

| | | | | |
|---|---|---|---|---|
| कल्याणाभिनिवेश: | = | कल्याण | + | अभिनिवेश: |
| मण्डलोत्पलम् | = | | + | |
| इत्येतानि | = | | + | |
| गृहीत्वोद्गता | = | | + | |
| नाचारं | = | | + | |
| अद्यापि | = | | + | |

## 6. धातुलकारवचनानि लिखत-

| पदानि | धातु: | लकार: | वचनम् |
|---|---|---|---|
| नश्यति, | | | |
| पालयति | | | |
| जनयति | | | |
| उद्भवति | | | |
| करोति | | | |

## 7. प्रकृतिप्रत्ययौ लिखत-

| | प्रकृति: | प्रत्यय: |
|---|---|---|
| | .................. | .................. |
| जननी | .................. | .................. |
| विनीत: | .................. | .................. |
| श्रुतम् | .................. | .................. |
| चपला | .................. | .................. |

## 8. मेलनं कुरुत-

| (अ) | (ब) |
|---|---|
| नाचारं | मदम् |
| मदिराया: | खलजनप्रिया |
| अमृतदाहोदरापि | पालयति |
| गुणवन्तमपवित्रमिव | कटुकविपाका |
| पुरुषोत्तमरतापि | न स्पृशति |

## 9. समासविग्रहं कुरुत-

पुरुषोत्तमः

क्षीरसागरः

खलजनप्रिया

## 10. विभक्तिवचनं च लिखत-

| | | |
|---|---|---|
| ईश्वरताम् | लक्ष्म्या | क्षीरसागरात् |
| मदिरायाः | दातारम् | |

## योग्यताविस्तारः-

- लक्ष्मीदोषाः वर्णनीयाः ।
- बाणभट्टस्य परिचयः लेखनीयः ।
- कादम्बरीकाव्यस्य परिचयः लेखनीयः ।

❖ ❖ ❖

# त्रयोदशः पाठः

## वासन्त्याः उपालम्भः

अस्मिन् नाट्यांशे लोकापवादभयेन परित्यक्तायाः सीतायाः वर्णनम् अस्ति। भगवतः रामचन्द्रस्य निर्मलचरित्रे सीतापरित्यागप्रसङ्गः चन्द्रे कलङ्क इव दुस्सहः प्रतिभाति भावकान् भक्तान्। किन्तु अस्याः शङ्कायाः समाधानं अत्र पाठे शोकसन्तप्तस्य रामस्य करुणदशाप्रसङ्गेन भवति। रामस्तु निर्दोषः किन्तु राजारामे दोषः इति सिध्यति। सीता कथमपि स्वपरित्यागम् अधिकृत्य रामं न दूषयति। अतः सीता रामस्य दुःखं वासन्तीकृतोपालम्भनञ्च न सहते यतः सा रामस्याभ्यन्तरं जानाति। महाकविना भवभूतिना करुणरसस्य जाह्नव्यां सीतारामौ निमज्य तयोः लोकापवादजनितकालुष्यं प्रक्षालितम्। महाकविभवभूतिः करुणरसस्य सिद्धः कविः। न केवलं संस्कृतसाहित्ये अपितु अन्यत्रापि नैतादृशस्य कारुण्यस्य अमृतास्वादः सुलभः, इति निर्विवादः। अस्य महाकवेः रूपकत्रयम् उपलभ्यते। करुणरसयुक्तम् उत्तररामचरितं नाटकं तथैव वीररसयुक्तं महावीरचरितम् शृङ्गाररसाश्रितं मालतीमाधवं प्रसिद्धम् अस्ति। महाकविभवभूतेः कालः अष्टम्यां शताब्द्यां वर्तते। अयं नाट्यांशः उत्तररामचरितनाटकस्य तृतीयाङ्कात् स्वीकृतः।

**वासन्ती** - महाराज ! ननु पृच्छामि कुशलं कुमारलक्ष्मणस्येति।

**रामः** - (आत्मगतम्) अये ! महाराजेति निष्प्रणयमामन्त्रणपदम्। सौमित्रिमात्रके वाष्पस्खलिताक्षरः कुशलप्रश्नः। तथा मन्ये विदितसीतावृत्तान्तेयमिति। (प्रकाशम्) आः ! कुशलं कुमारलक्ष्मणस्य।

**वासन्ती** - (रोदिति) अयि देव ! किं परं दारुणः खल्वसि ?

**सीता** - सखि वासन्ति ! किं त्वमेवंवादिनी भवसि ? पूजार्हः सर्वस्यार्यपुत्रः विशेषतो मम प्रियसख्याः।

**वासन्ती** - *त्वं जीवितं, त्वमसि मे हृदयं, द्वितीयं*
*त्वं कौमुदी नयनयोरमृतं त्वमङ्गे।*
*इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां,*
*तामेव शान्तमथवा किमतः परेण॥*

(इति मुह्यति)

**तमसा** - स्थाने, वाक्यनिवृत्तिर्मोहश्च।

**रामः** - सखि ! समाश्वसिहि समाश्वसिहि।

**वासन्ती** - (समाश्वस्य) तत्किमिदमकार्यमनुष्ठितं देवेन ?

**सीता** - सखि वासन्ति ! विरम, विरम।

**रामः** - लोको न मृष्यतीति।

**वासन्ती** - कस्य हेतोः ?

**रामः** - स एव जानाति किमपि।

**तमसा** - चिरादुपालम्भः।

**सीता** - सखि वासन्ति ! त्वमेव दारुणा कठोरा च यैवं प्रलपन्तं प्रलापयसि।

**वासन्ती** - अयि कठोर ! यशः किल ते प्रियं किमयशो ननु घोरमतः परम् ! किमभबद्विपिने हरिणीदृशः ? कथय नाथ ! कथं बत ! मन्यसे ?

**तमसा** - प्रणय एवं व्याहरति शोकश्च।

**रामः** - सखि ! किमत्र मन्तव्यम् ? हा प्रिये जानकि ! क्वासि ?

**सीता** - हा धिक् हा धिक् ! ...अन्य इवार्यपुत्रः प्रमुक्तकण्ठं प्ररूदितो भवति।

**तमसा** - वत्से ! साम्प्रतिकमेवैतत्। कर्त्तव्यानि खलु दुःखितैर्दुःखनिर्धारणानि। ... विशेषतो रामभद्रस्य बहुप्रकारकष्टो जीवलोकः।

***इदं विश्वं पाल्यं, विधिवदभियुक्तेन मनसा,***
***प्रियाशोको जीवं, कुसुममिव धर्मो ग्लपयति।***
***स्वयं कृत्वा त्यागं विलपनविनोदोऽप्यसुलभ-***
***स्तदद्याप्युच्छवासो भवति ननु लाभो हि रुदितम् ॥***

कष्टं भोः ! कष्टम्। ...... हे भगवन्तः पौरजानपदाः !

**वासन्ती** - (स्वगतम्) अतिगभीरमापूरणं मन्युभारस्य। (प्रकाशम्) देव ! अतिक्रान्ते धैर्यमवलम्ब्यताम्।

**राम** - किमुच्यते धैर्यमिति ?

***देव्याः शून्यस्य जगतो द्वादशः परिवत्सरः।***
***प्रणष्टमिव नामापि न च रामो न जीवति ॥***

**सीता** - अपहरामि च मोहितेव एतैरार्यपुत्रस्य प्रियवचनैः।

## शब्दार्थ:

| | | |
|---|---|---|
| ननु | - | नि: सन्देहार्थक :(अव्ययविशेष:) |
| सौमित्र: | - | लक्ष्मण: |
| एवंवादिनी | - | इत्थंभाषिणी |
| कौमुदी | - | चन्द्रिका |
| समाश्वसिहि | - | धैर्यं धारय |
| घर्म: | - | सूर्यातप: |
| मृष्यति | - | मुञ्चति |
| विपिने | - | अरण्ये |
| प्रलापम् | - | रोदनम् |
| खलु | - | निश्चयेन |
| अवलम्व्य ताम् | - | आश्रयताम् |
| परिवत्सर: | - | वर्षम् |
| प्रणष्टमिव | - | नष्टमिव |
| अपहरामि | - | दूरीकरोमि |
| बत | - | (कष्टसूचकाव्ययपदम्) |
| मन्यसे | - | जानासि |
| पौरजानपदा: | - | नागरिका: |

## अभ्यास:

### 1. एकपदेन उत्तरं लिखत-

क. क: पूजार्ह: ?

ख. वासन्त्या: उपालम्भ: इति पाठे क: रस: ?

ग. का दारुणा कठोरा च ?

घ. क: प्रयुक्तकण्ठं रोदिति ?

ङ. वासन्ती कस्य कुशलं पृच्छति ?

2. **अधोलिखितानां पदानां विभक्ति निर्देशपूर्वकं कारकं निर्दिशत-**

| | विभक्तिः | - | कारकम् |
|---|---|---|---|
| देवेन कार्यं अनुष्ठितम् | तृतीया | - | कर्त्ता (अनुक्त) |
| आः कुशलं कुमारलक्ष्मणस्य। | = | | |
| त्वमसि मे हृदयं द्वितीयम्। | = | | |
| कस्य हेतोः। | = | | |
| हा प्रिये जानकि। | = | | |
| एतैः आर्यपुत्रस्य प्रियवचनैः। | = | | |

3. **अधोलिखितेषु वाक्येषु रिक्तस्थानानि पूरयत-**

क. त्वं................ त्वमसि मे ............... द्वितीयम्।

ख. ................... न मृष्यति।

ग. .................. किल ते प्रियम्।

घ. त्वमेव .................. कठोरा च।

ङ. विशेषतो रामभद्रस्य बहुप्रकारकष्टो ..................।

च. प्रणष्टमिव .............. न च रामो न जीवति।

4. **अधोलिखितानां पदानां सन्धिविच्छेदं कुरुत-**

| पदम् | | सन्धिविच्छेदः | | |
|---|---|---|---|---|
| लक्ष्मणस्येति | = | लक्ष्मणस्य | + | इति |
| स्खलिताक्षरः | = | | + | |
| त्वमेवंवादिनी | = | | + | |
| पूजार्हः | = | | + | |
| नयनयोरमृतम् | = | | + | |
| प्रियशतैरनुरुध्य | = | | + | |
| कार्यमनुष्ठितम् | = | | + | |
| चिरादुपालम्भः | = | | + | |
| कुसुममिव | = | | + | |
| विधिवदभियुक्तेन | = | | + | |
| विनोदोऽप्यसुलभः | = | | + | |
| किमुच्यते | = | | + | |
| धैर्यमवलम्व्यताम् | = | | + | |

5. **समुचितपदेन रिक्तस्थानं पूरयत-**

क. किं परं .............. खल्वसि। (दारुण:/करुण:)

ख. पूजार्ह: सर्वस्यार्यपुत्र: विशेषतो ............... प्रियसख्या:। (मम/तव)

ग. त्वमेव दारुणा ......... च। (कठोरा/कोमला)

घ. कर्त्तव्यानि ............. दु:खितैर्दु:ख निर्धारणानि। (ननु/खलु)

ङ. प्रणय एवं ............. शोकश्च। (अपहरति/व्याहरति)

6. **पुरुषवचनलकारान् लिखत-**

| पदानि | धातु: | वचनम् | लकार: |
|---|---|---|---|
| विरम | | | |
| मृष्यति | | | |
| मन्यसे | | | |
| प्रलापयसि | | | |
| हरति | | | |

7. **प्रकृतिप्रत्ययौ लिखत-**

प्रलपन् कर्त्तव्यम्

कृत्वा प्रणष्टम्

8. **समुचितपदेन मेलनं कुरुत-**

| (अ) | (ब) |
|---|---|
| पूजार्ह: | प्रियम् |
| हरिणीदृश: | दारुणा कठोरा च |
| प्रमुक्तकण्ठम् | रोदनम् |
| त्वमेव | सीता |
| यश: | राम: |

9. **अधोलिखितेषु अव्ययपदानि पृथक् कुरुत-**

ननु, दारुण:, जीवितम्, अथवा, चिरात्,

शोक:, भवति, स्वयं, लाभ:, जगत:

10. **पाठात् दश विशेषणपदानि चित्वा लिखत।**

**योग्यताविस्तार:-**

- रामकथाश्रितानां नाटकानां सूचीं रचयत।
- भवभूते: रचनानां परिचयं लिखत।
- पाठे प्रयुक्तानां क्रियापदानां सङ्कलनं कुरुत।

❖ ❖ ❖

## चतुर्दशः पाठः

# काव्यानुशासनम्

संस्कृतभाषायां काव्यप्रणयेन सहैव काव्यानुशासनस्यापि परम्परा प्राचीनकालात् प्रचलति। यथा भासकालिदासशूद्रकभवभूतिबाणभट्टादयाः कवयः प्रसिद्धाः सन्ति तथैव भरतभामहदण्डीरुद्रटराजशेखरादयः काव्यानुशासनकर्तारः प्रसिद्धाः सन्ति। अतः काव्यपरिचयेन सहैव काव्यानुशासनपरिचयः अपि अपेक्षितः भवति। अनया दृष्ट्या दण्डिनः काव्यादर्शग्रन्थः परमलोकप्रियः विद्यते। अतः एतस्मात् ग्रन्थात् काव्यानुशासनसम्बन्धीनि कानिचित् पद्यानि अत्र सङ्कलितानि सन्ति। अनेन काव्यानुशासनपरिचयो भविष्यति।

*इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा।*
*वाचामेव प्रसादेन लोकयात्रा प्रवर्तते ॥ 1 ॥*

**अन्वयः -** इह शिष्टानुशिष्टानां शिष्टानाम् अपि लोकयात्रा सर्वथा वाचामेव प्रसादेन प्रवर्तते।

**शब्दार्थः -**

| | | |
|---|---|---|
| शिष्टानुशिष्टानाम् | - | अधीतानधीतानाम् |
| वाचामेव | - | वचनानाम् एव |
| लोकयात्रा | - | व्यवहारः |

*इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्।*
*यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥ 2 ॥*

**अन्वयः -** इदं कृत्स्नं भुवनत्रयम् अन्धन्तमः जायेत यदि आसंसारं शब्दाह्वयं ज्योतिः न दीप्यते।

**शब्दार्थः -**

| | | |
|---|---|---|
| इदमन्धतमः | - | गाढान्धकारः |
| कृत्स्नम् | - | सकलम् |
| शब्दाह्वयम् | - | भाषात्मकम् |
| ज्योतिरासंसारम् | - | तेजस्। प्रकाशः |
| आसंसारम् | - | आजीवनम् |

*आदिराजयशोबिम्बमादर्शं प्राप्य वाङ्मयम्।*
*तेषामसन्निधानेऽपि न स्वयं पश्य नश्यति ॥ 3 ॥*

**अन्वयः -** आदिराजयशोबिम्बम् आदर्शं वाङ्मयं प्राप्य तेषाम् असन्निधानेऽपि न स्वयं नश्यति।

**शब्दार्थ: -** आदिराजयशोबिम्बमादर्शम् - आदिराजकीर्तिधामाम्

आदर्शम् - दर्पणम्

तेषामसन्निधानेऽपि - तेषाम् अनुपस्थितौ अपि

वाङ्मयम् - साहित्यम्

***गौर्गौः कामदुधा सम्यक् प्रयुक्ता स्मर्यते बुधैः ।***
***दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति ॥ 4 ॥***

**अन्वय: -** गौः गौः सम्यक् प्रयुक्ता बुधैः स्मर्यते । पुनः सा एव दुष्प्रयुक्ता: प्रयोक्तुः गोत्वं शंसति ।

**शब्दार्थ: -** कामदुधा - कामधेनु

दुष्प्रयुक्ता - अनुवितरूपेण प्रयुक्ता

पुनर्गोत्वम् - पुनः वाग्मिताम्

***तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन ।***
***स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम् ॥ 5 ॥***

**अन्वय: -** तत् काव्ये अल्पम् अपि दुष्टं कथञ्चन् न उपेक्ष्यं सुन्दरम् अपि वपुः एकेन श्वित्रेण दुर्भगं स्यात् ।

**शब्दार्थ: -** नोपेक्ष्यम् - उपेक्षा न करणीया

दुष्टम् - दूषितम्

श्वित्रैणैकेन - कुवस्त्रेण

दुर्भगम् - असमीचीनम् । असुन्दरम्

***गुणदोषान् शास्त्रतः कथं विभजते जनः ।***
***किमन्धस्याधिकारोऽस्ति रूपभेदोपलब्धिषु ॥ 6 ॥***

**अन्वय: -** अशास्त्रज्ञः जनः गुणदोषान् कथं विभजते । किं रूपभेदोपलब्धिषु आधिकारोऽस्ति ?

**शब्दार्थ: -** अशास्त्रज्ञः - शास्त्रज्ञानहीनः

किमन्धस्याधिकारोऽस्ति - नेत्रहीनस्य दर्शनाधिकारोऽस्ति

रूपभेदोपलब्धिषु - रूपभेदपरिज्ञानेषु

***अतः प्रजानां व्युत्पत्तिमभिसन्धाय सूरयः ।***
***वाचां विचित्रमार्गाणां निबबन्धुः क्रियाविधिम् ॥ 7 ॥***

**अन्वय: -** अतः सूरयः प्रजानां व्युत्पत्तिम् अभिसन्धाय विचित्रमार्गाणां वाचां क्रियाविधिं निबबन्धुः ।

**शब्दार्थ: -** व्युत्पत्तिमभिसन्धाय - ज्ञानं प्राप्य

विचित्रमार्गाणाम् - विविधरीतीनाम्

निबबन्धुः - रचयामासुः

*इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत् ।*

*तथापि न तदाख्यातुं सरस्वत्यापि शक्यते ॥ 8 ॥*

**अन्वयः -** इक्षुक्षीरगुडादीनां माधुर्यस्य अन्तरं महत्। तथापि सरस्वत्या अपि तद् आख्यातुं न शक्यते।

**शब्दार्थः -**

| | | |
|---|---|---|
| इक्षुक्षीरगुडादीनाम् | - | इक्षु-क्षीर-गुड-पदार्थानाम् |
| माधुर्यस्यान्तरम् | - | माधुर्यभेदम् |
| तदाख्यातुम् | - | तन्निरूपयितुम् |

*नैसर्गिकी च प्रतिभा श्रुतं च बहुनिर्मलम् ।*

*अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः ॥ 9 ॥*

**अन्वयः -** नैसर्गिकी प्रतिभा बहुनिर्मलं श्रुतं च अमन्दः अभियोगः तथा अस्याः काव्यसम्पदः कारणं।

**शब्दार्थः -**

| | | |
|---|---|---|
| नैसर्गिकी | - | स्वाभाविकी |
| अमन्दश्चाभियोगोऽस्याः | - | प्रबलशक्तिः |
| काव्यसम्पदः | - | काव्यसम्पत्तेः |

*न विद्यते यद्यपि पूर्ववासनागुणानुबन्धिप्रतिभानमद्भुतम् ।*

*श्रुतेन यत्नेन च वागुपाश्रिता ध्रुवं करोत्येव कमप्यनुग्रहम् ॥ 10 ॥*

**अन्वयः -** यद्यपि पूर्ववासनागुणानुबन्धि अद्भुतं प्रतिभानं न विद्यते श्रुतेन यत्येन न उपाश्रिता वाक् ध्रुवं कमपि अनुग्रहं करोति एव।

**शब्दार्थः -**

| | | |
|---|---|---|
| वागुपाश्रिता | - | वचनाधीना |
| कमप्यनुग्रहम् | - | दिव्यम् अनुग्रहम् |

## अभ्यासः

**1. एकपदेन उत्तरं लिखत-**

क. कासां प्रसादेन लोकयात्रा प्रवर्तते ?

ख. 'कृत्स्नं' इति पदं कस्य पदस्य विशेषणमस्ति ?

ग. आदिराजयशोबिम्बमिति कस्य कृते प्रयुक्तमस्ति ?

घ. कीदृशी वाक् प्रयोक्तुः गोत्वं शंसति ?

ङ. काव्ये किम् अल्पमपि न उपेक्षम् ?

**2. एकवाक्येन उत्तरं लिखत-**

क. अन्धस्य कुत्र अधिकारः न भवति ?

ख. सूरयः किं कृतवन्तः ?

ग. सरस्वत्या किं आख्यातुं न शक्यते ?

घ. कानि काव्यसम्पदः कारणानि ?

ङ. कीदृशी वाक् अनुग्रहं करोति ?

**3. त्रिंशत् पदैः उत्तरं लिखत-**

क. शब्दस्य महत्वं लिखत।

ख. दोषमधिकृत्य वाक्यत्रयं लिखत।

ग. काव्यकारणमाधिकृत्य वाक्यत्रयं लिखत।

**4. अधोलिखितानां पदानां विभक्तिं वचनं च निर्दिशत-**

वाचाम्, प्रसादेन, प्रयोक्तुः

काव्ये, अन्धस्य

**5. अधोलिखितानां लकारपुरुषवचनानि निर्दिशत-**

| पदानि | लकारः | पुरुषः | वचनम् |
|---|---|---|---|
| प्रवर्तते | | | |
| जायेत | | | |
| नश्यति | | | |
| शंसति | | | |
| विभजते | | | |

**6. अधोलिखितेषु सर्वनामपदानि पृथक् कुरुत ।**

इदम्

ज्योतिः

तेषाम्

गौः

दुष्टम्

कम्

7. **अधोलिखितेषु अव्ययपदानि पृथक् करणीयानि-**

इह

यदि

सर्वथा

प्रजानाम्

अनुग्रहम्

8. **अधोलिखितेषु विशेषणपदानि पृथक् कुरुत-**

कृत्स्नम्, कामदुधा, अल्पम्

माधुर्यस्य प्रतिभा

9. **अधोलिखितानां पदानां विग्रहं कुरुत-**

शिष्टानुशिष्टानाम्, पुनर्गोत्वम्, श्वित्रैणैकेन

अन्धस्याधिकार: माधुर्यस्याधिकार: माधुर्यस्यान्तरम्

10. **अधोलिखितानां समासविग्रहं कुरुत-**

लोकयात्रा, कामदुधा, गुणदोषान्

विचित्रमार्गाणाम् इक्षुक्षीरगुडादीनाम्

**योग्यताविस्तार:-**

- काव्यशास्त्रीणां नामानि सङ्कलनीयानि।
- काव्यशास्त्रीयग्रन्थानां सूची रचनीया।
- काव्यस्य प्रयोजनानि वर्णनीयानि।

❖ ❖ ❖

**पञ्चदशः पाठः**

# शुकोपदेशः

पाण्डववंशीयः सम्राट् परीक्षितः अभिमन्योः उत्तरायां जातः। अयम् अर्जुनस्य पौत्रः आसीत्। स एकदा अश्वमेधेन विष्णुं पूजयित्वा, स्वराज्यात् कलिं निस्सार्य तत् निवासार्थं धूतं मद्यं स्वर्णादिकं दत्त्वा शिरसि धृतस्वर्ण मुकुटः धर्मेण श्रान्तः पिपासितः शृङ्गीमुनेः आश्रमं प्राप्तः। तत्र मुनिः समाधिमास्थितः आसीत्। अतः मुनिना असत्कृतः परीक्षितः क्रोधात् तत्र मृतं तक्षकं सर्पं मुनेः कण्ठे निक्षिप्य पिपासित एव स्वराजधानीं प्रस्थितः। तदैव क्रीडार्थं गतः मुनिपुत्र आगत्य धृतसर्पकण्ठं पितरं दृष्ट्वा सर्वं ज्ञात्वा च उच्चैः रुरोद, परीक्षितं शशाप च। 'अयं तक्षकः सप्तमे दिने त्वां धक्ष्यतीति।' भग्नसमाधिः मुनिः इदं शापं श्रुत्वा दुःखितः धिक्कारयन् स्वपुत्रं-"त्वया नोचितं कृतं यत् मूर्धाभिसिक्ताय राज्ञे शापः दत्तः।" अनन्तरमेव तेन शिष्यः तत्सूचनार्थं राज्ञः सन्निधौ प्रेषितः। शापं श्रुत्वाऽपि अक्षुब्धो राजा सप्तदिनाभ्यन्तरे कथं मुक्त्युपायो भवेत् इति विचिन्त्य गङ्गातीरे ब्रह्मर्षीणां मध्ये तान् स्वः शापं कथयित्वा आत्मनः मुक्त्यर्थं निवेदितवान्। तदैव बालसूर्यमिव दीप्तिमन्तं योगिनम् अवधूतं शुकदेवं तत्र आगतं दृष्ट्वा परीक्षितः तं प्रणम्य स्वमुक्तेः उपायं पपृच्छ। शुकः उवाच सप्तदिनं यावत् श्रीमद्भागवतपुराणश्रवणेन ते भक्तिज्ञान विरागाप्ता मुक्तिः असंशयं भविष्यति। ततः प्रार्थितः शुकः तं श्रीमद्भागवत पुराणं श्रावयामास। सप्तमे शापदिने पुराणसमाप्तौ शुकदेवः द्वादशस्कन्धे भागवतपुराणस्य निष्कर्षं त्रयोदश श्लोकेषु उक्तवान्। शुकदेवस्य अन्तिमोपदेशः पाठे वर्तते।

*अत्रानुवर्ण्यतेऽभीक्ष्णं विश्वात्मा भगवान् हरिः।*
*यस्य प्रसादजो ब्रह्मा रूद्रः क्रोधसमुद्भवः॥ 1॥*

**अन्वयः -** अत्र विश्वात्मा भगवान् हरिः अभीक्ष्णम् अनुवर्ण्यते यस्य प्रसादजः ब्रह्मा, क्रोधसमुद्भवः रूद्रः (स्तः)।

**शब्दार्थः -** अनुवर्ण्यते - कथ्यते

*त्वं तु राजन् मरिष्येति पशुबुद्धिमिमां जहि।*
*न जातः प्रागभूतोऽद्य देहवत्त्वं न नङ्क्ष्यसि॥ 2॥*

**अन्वय: -** हे राजन् त्वं तु (अहं) मरिष्येति इमां पशुबुद्धिं जहि। त्वं देहवत् प्राक् न अभूत् अद्य जात:, नंक्ष्यसि (च)।

**शब्दार्थ: -**

| | | |
|---|---|---|
| जहि | - | नाशय |
| अभीक्ष्णं | - | निरन्तरम् |
| जात: | - | उत्पन्न: |
| अभूत् | - | आसात् |
| देहवत् | - | देहतुल्यम् |

***न भविष्यति भूत्वा त्वं पुत्रपौत्रादिरूपवान्।***

***बीजाङ्कुरवद् देहादेर्व्यतिरिक्तो यथानल: ॥ 3 ॥***

**अन्वय: -** त्वं भूत्वा मृत्वा पुत्र पौत्रादि रूपवान् बीजांकुरवत् न मरिष्यति। (यस्मात्) देहादे: व्यतिरिक्त: त्वं (देहात् देह एव जायते न तु आत्मा) यथा अनल (कष्टात् व्यतिरिक्त:)।

**शब्दार्थ: -**

| | | |
|---|---|---|
| बीजांकुरवत् | - | बीजाङ्कुरतुल्यम् |
| व्यतिरिक्त: | - | पृथक्, भिन्न: |

***स्वप्ने यथा शिरच्छेदं पञ्चत्वाद्यात्मन: स्वयम्।***

***यस्मात् पश्यति देहस्य तत आत्मा ह्यजोऽमर: ॥ 4 ॥***

**अन्वय: -** यथा स्वप्ने आत्मन: शिरच्छेदं पञ्चत्वादि स्वयं पश्यति तस्मात् (एवं तद्वदेव) आत्मा हि अजर: अमर: इति।

**शब्दार्थ: -**

| | | |
|---|---|---|
| पञ्चत्वादि | - | मरणादि |
| अज: | - | अजन्मा |

***घटे भिन्ने यथाऽऽकाश आकाश: स्याद् यथा पुरा।***

***एवं देहे मृते जीवो ब्रह्म सम्पद्यते पुन: ॥ 5 ॥***

**अन्वय: -** घटे भिन्ने आकाश: यथा पुरा (तथा) आकाश: स्यात्। एवं देहे मृते जीव: पुन: ब्रह्म संपद्यते।

**शब्दार्थ: -**

| | | |
|---|---|---|
| भिन्ने | - | पृथक्भूते सति |
| सम्पद्यते | - | घटते |

***मन: सृजति वै देहान् गुणान् कर्माणि चात्मन:।***

***तन्मन: सृजते माया, ततो जीवस्य संसृति: ॥ 6 ॥***

**अन्वय: -** मन: आत्मन: देहान् गुणान् कर्माणि च सृजति माया तत् मन: सृजते तत: जीवस्य संसृति: (भवति न स्वत:)

**शब्दार्थ: -**

| | | |
|---|---|---|
| संसृति: | - | संसार: |

*स्नेहाधिष्ठानवर्त्यग्निसंयोगो यावदीयते ।*

*ततो दीपस्य दीपत्वमेवं देहकृतो भवः ।*

*रजः सत्वतमोवृत्या जायतेऽथ विनश्यति ॥ 7 ॥*

**अन्वयः -** यावत् स्नेह-अधिष्ठानं-वर्ति-अग्नि संयोगः ईयते (प्रतीयते ततः दीपस्य दीपत्वम् । एवं देहकृतः भवः । (दीप संसारः) रजः सत्वतमोवृत्या जायते अथ विनश्यति च ।

| | | |
|---|---|---|
| **शब्दार्थः -** अधिष्ठानः | - | दीपकः |
| वर्ती | - | वर्तिका |
| इयते | - | प्रतिभाति |
| भवः | - | संसारः |

*न तत्रात्मा स्वयंज्योतिर्यो व्यक्ताव्यक्तयोः परः ।*

*आकाश इव चाधारो ध्रुवोऽनन्तोपमस्ततः ॥ 8 ॥*

**अन्वयः -** न तत्र (स्थितोऽपि) आत्मा (तथा) न (यतः) व्यक्ताव्यक्तयोः परः स्वयं ज्योतिः आकाश इव आधारः (देहादेः) ध्रुवः अनन्तोपमः ततः (व्याप्तः)।

| | | |
|---|---|---|
| **शब्दार्थः -** ज्योतिः | - | प्रकाशः |
| ध्रुवः | - | निश्चितः |

*एवमात्मानमात्मस्थमात्मनैवामृश प्रभो ।*

*बुद्ध्यानुमानगर्भिण्या वासुदेवानुचिन्तया ॥ 9 ॥*

**अन्वयः -** हे प्रभो वासुदेवानुचिन्तया (युक्तः त्वं) अनुमान गर्भिण्या बुद्ध्या आत्मना आत्मस्थम् आत्मानम् आमृश (विविच्य) पश्य ।

| | | |
|---|---|---|
| **शब्दार्थः -** अनुमानगर्भिण्या | - | अनुमानयुक्तया |
| अनुचिन्तया | - | सतत् चिन्तनेन् |

*चोदितो विप्रवाक्येन न त्वां धक्ष्यति तक्षकः ।*

*मृत्यवो नोपधक्ष्यन्ति मृत्युनां मृत्युमीश्वरम् ॥ 10 ॥*

**अन्वयः -** विप्रवाक्येन चोदितः तक्षकः त्वां न भक्षति । (किन्तु देहमेव) यतः मृत्यवः (कालादयः) मृत्युनां मृत्युम् ईश्वरं (आत्मानं) न उपधक्ष्यन्ति ।

| | | |
|---|---|---|
| **शब्दार्थः -** चोदितः | - | प्रेरितः |
| धक्ष्यति | - | कर्तनं करिष्यति |

*अहं ब्रह्म परं धाम ब्रह्माहं परमं पदम् ।*

*एवं समीक्षन्नात्मानमात्मन्याधाय निष्कले ॥ 11 ॥*

*दशन्तं तक्षकं पादे लेलिहानं विषाननैः ।*

*न द्रक्ष्यसि शरीरं च विश्वं च पृथगात्मनः ॥ 12 ॥*

**अन्वयः -** अहं परं धाम (सर्वाश्रयं) ब्रह्म परं पदं (परमाश्रयं) ब्रह्म अहम् एव । एवं ***निष्कले*** आत्मनि (ब्रह्मणि) आत्मानम् आधाय (एकीकृत्य) समीक्षन् । (आर्यः) विषयुक्तैः आननैः स्वपादे दशन्तं तक्षकं लेलिहानं शरीरं च विश्वं च आत्मनः पृथक् न द्रक्ष्यसि ।

**शब्दार्थः -**

| | | |
|---|---|---|
| अधाम | - | स्थापयित्वा |
| दशन्तम् | - | दशनं कुर्वन्तम् |
| **निष्कले** | - | **अखण्डे** |

*एतत्ते कथितं तात यथाऽऽत्मा पृष्टवान् नृप ।*

*हरेर्विश्वात्मनश्चेष्टां किं भूयः श्रोतुमिच्छसि ॥ 13 ॥*

**अन्वयः -** हे नृप ! हे तात आत्मा (त्वं) यथा विश्वात्मनो हरेः चेष्टां (लीलां) पृष्टवान् तथा एतत् । (सूर्यं ते मया) कथितम् । भूयः किं श्रोतुम् इच्छसि ।

**शब्दार्थः -**

| | | |
|---|---|---|
| नृपः | - | भूपः |
| चेष्टाम् | - | लीलाम् |

## अभ्यासः

**1. एकपदेन उत्तरं लिखत-**

क. राज्ञः पशुबुद्धिः का अस्ति ?

ख. अजः अमरः कः अस्ति ?

ग. देहे मृते जीवः किं सम्पद्यते ?

घ. माया किं सृजते ?

ङ. व्यक्ताव्यक्तयोः परः कः ?

च. कः त्वां न धक्ष्यति ?

**2. पूर्णवाक्येन उत्तरं लिखत-**

क. आत्मा स्वप्ने किं पश्यति ?

ख. मन: किं किं सृजति ?

ग. दीपस्य दीपत्वं कथं भवति ?

घ. आत्मा आत्मना कथम् आमृश्यते ?

ङ. आत्मन: पृथक् किं किं न दर्शनीयम् ?

च. क: कं कुत्र उपदिशति ?

**3. कोष्ठकपदानि उपयुज्य रिक्तस्थानानि पूरयत-**

(ब्रह्म, मरिष्येति, तक्षक:, यथात्मा, माया, श्रोतुम्)

क. त्वं तु राजन् ............ पशुबुद्धिमिमांजहि।

ख. देहे मृते जीव: ............. सम्पद्यते पुन:।

ग. तन्मन: सृजते ................।

घ. न त्वां धक्ष्यति ...............।

ङ. एतत्ते कथितं तात ............ पृष्ठवान् नृप।

च. किं भूय: .............. इच्छसि।

**4. निम्नलिखितस्य श्लोकस्य अन्वयं लिखत-**

मन: सृजति वै देहान् गुणान् कर्माणि चात्मन:,

तन्मन: सृजते माया, ततो जीवस्य संसृति:।

**5. महर्षे:शुकदेवस्य परीक्षितं प्रति उपदेश: त्रिंशत्पदै:वर्ण्यताम्।**

**6. श्लोकांशान् यथायोग्यं योजयत-**

| | अ | ब |
|---|---|---|
| क. | अत्रानुवर्ण्यतेऽभीक्ष्णम् | ब्रह्म सम्पद्यते पुन:, |
| ख. | बीजांकुरवद् देहादे: | ब्रह्माहं परमं पदम्, |
| ग. | अहं ब्रह्म परं धाम | विश्वं च पृथगात्मन:, |
| घ. | न द्रक्ष्यसि शरीरं च | व्यतिरिक्तो यथानल:, |
| ङ. | एवं देहे मृते जीवो | विश्वात्मा भगवान् हरि:, |

**7. अधोलिखितेषु आत्मनो देहस्य च विशेषणानि विभज्य लिख्यन्ताम्-**

मृत:, अनन्त:, स्वयंज्योति:, स्वप्नेशिरच्छेद:, भिन्न: घटवत्, ध्रुव: बीजांकुरवत् आकाश इव चाधार:, व्यक्ताव्यक्तयो: पर:, मृत्यु:, स्नेहाधिष्ठानवर्त्यग्निसंयोग:, जीव: ।

**8. निम्नलिखितानां शब्दानां सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत-**

विश्वात्मा, प्रसादजो ब्रह्मा, हयजोऽमर:, मरिष्येति, अनन्तोपम:

**9. निम्नलिखितानां मूलशब्दं प्रत्ययं च लिखत-**

भूत्वा, भिन्न:, मृत:, संसृति:, श्रोतुं पृष्टवान्

**10. पाठात् पञ्च अव्ययानि चिनुत ।**

**योग्यताविस्तार:-**

- श्रीमद्भागवतस्य परिचयो लेख्य: ।
- पुराणानां नामानि लिखत ।

❖ ❖ ❖